Subject- Sanskrit

SEM- 4 (Programme)

Course Code- APSNS 401C-1D

Course Title- Rājdharma & Brahmatatwṃ

**Course Topic- Manusaṃhitā 7th Chapter Manvarthamuktāvalī**

**यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः।**

**तस्मातभिबवत्येष सर्वभुतानि तेजसा।।5।।**

**उत्सः** – धर्मशास्त्रकारेण मनुना प्रणिताया मनुसंहिताया राजभर्मो नाम सप्तमाध्यायात् श्लोकोऽयं संगृहीतः।

**प्रसङ्गः** – ईश्वरेण राज्ञः सृष्टिस्तथा राज्ञः प्रभावः अनेन श्लोकेन वर्ण्यते।

**अन्वयः** - यस्मात् एषां सुर-इन्द्राणाम् मात्राभ्यः निर्मितः नृपः, तस्मात् एषः तेजसा सर्वभुतीनि अभिभवति ।

**व्याख्या** – लोके मात्स्यन्यायं निवारयितुमीश्वर इन्द्र-वायु-यम-सूर्याग्नि-वरुण-चन्द्र-कुवेराणां शाश्वतीः अर्थात् मन्वन्तरव्यापिनीः सारबूता वा मात्रा अर्थात् अवयवानाकृष्य राजानमसृजत्। एते अष्ट देवा देवानां श्रेष्ठाः। एतेषामपि सारभूतानंशान् एकीकृत्य राजा सृष्ट ईश्वरेण। अत एव सुस्पष्टं ज्ञायते यत् राजा सर्व प्राणिनो वीर्येणातिशेते ।